
Patana (पातन) lowering the eyebrows

Use tenderness

Bhrukuti (भृकुटि) casting two brows upward from the roots.

Use sringar, ras

Nikuncit (निकुञ्चित) softly breaking one on two brows.

Use several erotic gestures like mottayit (मोट्टायित) etc.

Recita lifting up gracefslly one of the eye brows.

Use dancing

Swabhavika (स्वाभाविक) natural pose of the brows.

Use narmal moods.

Movements of lips (अधर)।

Vivartana (विवर्तन) curving the teeth at the end of the mouth.

Use jealousy

Kampa making the lower lips quivering

Use anger

Visarga protruding the lower lip

Use anger

Viguhana (विगूहन) taking in the end of the lower lip.

Use dragging and in form of mental dearrangement

Samadast biting the lip with the teeth.

Use veer rash and raudra rash

Samudga first rolled and then raised

Use compassion

Svabhavaj (स्वभावज) the natural movement should be used in the remaining states.

अग्निपुराण Says षोढौष्ठकर्मकं but here only Seven are in numbers, both the Puranas have different views

अग्नि पुराण षौढौष्ठकं
अमिमुख्यं नयन्नर्थान्विज्ञेयोऽभिनयोबुधैः।
चतुर्धा सम्भवः सत्ववागङ्गहरणाश्रयः।।
स्तम्भादिः सात्विको वागारम्भो वाचिकआङ्गिकः।
शरीराम्भ आहार्योबुध्दयारम्भ प्रवृत्तय प्रवृत्तयः।।

— अग्नि0 : 341 1–2

Abhinaya is of four types i.e. sattvik, angik, vachik and the fourth is called aharya the intellect based. The vishnudharmopuran too is of the same view.

Sattvik and angika, vacik abhinayas are based on their nautral bhavas and vritti, vacika accomplished through speech may be included in samanyabinaya. Aharyabhinaya is some what unique due to it's ingredients.

Aharyabhinaya

It's four kinds are mentioned as-

Pusta (पुष्ट) imitative forms made with clay. Wood, cloth, leather and iron are called pusta. The pratisirsa of gods, demons, yaksas, elephants, horse, deer and birds are made by pust technique.

Alankar consists of garlands, ornaments and garments.

Angaracana (अंगरचना) it includes the act of dressing up of the body in accordance with the caste, position of the character to be presented.

Sanjiva (सञ्जीव) entrance of animals on the stage is called sanjiva. Animal here means so called animal. Men here should wear masks of various animals thus the symbols of several gods carrying varient weapons should be represented on the stage it by masks. I may say a preparation–the act of intellectual mind.

The abhinaya itself is adeed of disguised person as the stage required, the skillful persons in art of dramaturgy and dance function it.

As says विष्णु धर्मोरत्तर पुराण (भाग 3– नृत्तसूत्र)

The mythical origin of dancing in 34 is recorded. The Vishnu was fighting with the demons madhu and kaitabha, lakshmi noticed the graceful movement of her lord, she wished to know what was indicated by these movements, lord Vishnu told her that they constituted the art of dancing. This art represents the three worlds, then Vishnu disclosed it's secret to brahma, imparted it to rudra, inabling him there by to aquire the title Nritteshwar.

I have here endeavoured to present a condensation of the subject as produced in agnipuran and by priybalashah in her English thanslation of vishnudhrmottar puran (part III)

It may enable the scholars of DramaTurgy and nritya.

Bedauli, Mandah
Allahabad (U.P.)
मो0 : 9369492819

TRI.NI.SHI.
SHASTRI
त्रि.नी.शि.शास्त्री

।।श्री।।

श्रीगणेशाय नमः

अभिनय चन्द्रिका

नमामि विघ्नराजंतं कल्पवृक्षतलस्थितं।
उमापुत्रं महाकायं दन्तिनं नृत्यकोविदम् ।।

ताण्डवप्रियपुत्राय ताण्डवप्रिय रूपिणे।
नमोस्तुचिन्तामणये शुद्धबुद्धि प्रदायक।।१

नीलकन्दरबासाय साधूनां हितकारिणे।
नमोनृसिंहरूपाय दिव्यरूप धरायते।।
अरूपाय सरूपाय दारुब्रह्म स्वरूपिणे।
नमोज्ञानस्वरूपाय बौद्धरूपायते नमः।।२

विद्याप्रज्ञास्त्ररूपेषु तन्मध्येनिगमो महान् ।
ज्ञानेष्वष्टादशोर्मध्ये चतुर्विद्यामनोरमा।।३

सिद्धविद्यायक्षिणीच विद्यागान्धर्व एवच।
चतुःषष्ठीकलाविद्या नरज्ञानं तदुच्यते।।४

लयस्तालस्तथामानः विविधः स्वरसाधनं।
*मृदङ्गतालभेदेन बीणा पट्टह वादनम् ।।५

शृणुचात्र प्रवक्षामि गान्धर्वज्ञानमुत्तमं।
गीतं वाद्यं च नृत्यं च त्रयी संगीतमुच्यते।।६

* M.S.S. 2– मृदङ्गतालज्ञानञ्च गान्धर्व ज्ञानमुत्तमम्

श्रवणे गीत वाद्यं च दृश्ये नृत्य मनोरमा।
गीतवाद्यद्वयोर्मध्ये नृत्यं चाति मनोरमम् ।।७

ग्रन्थकार परिचयम्

भारद्वाजस गोत्रेण महापात्रेण धीमता।
महेश्वरेणरचिता ग्रन्थोऽभिनयचन्द्रिका।।८

तालगीत समायुक्तं नृत्यज्ञान विवर्जितं।
विनासंगीतज्ञानेन पशुवद्राजते नरः।।९

सङ्गीतं देवताऽग्रे स्यात् संगीतं नृप सन्निधौ।
गणिकाभवने चैव नृत्यं सर्वत्र शोभितम् ।।१०

नृत्यनिषेध स्थलम्

संघारामे मठे युद्धे गृहे गुरु वनाश्रमे।
दुर्गेयज्ञालये नृत्यं न विधेयं कदाचन् ।।११

नृत्यविद्यामहत् पुण्या सर्वज्ञान विभूषिता।

बिद्याप्रचारकः

यत्प्रसिद्धं पुराकाले शङ्करात् शङ्करात्मजः।।१२

तत्समीपात्तु संप्राप्तंरम्भादेवाङ्गना ततः।
नृत्यज्ञानकलायुक्तो महान् वैभरतो मुनिः।।१३

गर्गाचार्य्यस्ततोज्ञात्वा विकटस्तत् समीपतः।
विकटात्नृत्यशिक्षार्थी कुमाराचार्य्यउत्तमः।।१४

रन्तिदेवनृपस्तस्मात् तलस्तुज्ञान संग्रही।
अट्टहास महान्प्राज्ञः उड्र नृत्य विशारदः।।१५

नृत्यंधर्माय शास्त्रोक्तं तालमानरसाश्रयम्।
तथा च देश भेदेन लौकिकं सुप्रतिष्ठितम् ।।१६

शृणुअत्रप्रवक्षामि उड्र गान्धर्वलक्षणं।
नृत्यभेदं, न्यासभेदं, प्रचारं, हेतु चालकम् ।।१७

क्षेत्रप्रकाशनं, भावं, बन्धभङ्गादि सप्तधा।
चारी, करण, स्थानाङ्ग, वर्ण्णनं जनमोहनम् ।।१८

लास्यंभावमयंनृत्यं नारीपक्षे सुशोभनं।
उग्रं पुरुषगात्रेण विचित्रमङ्गचालनम् ।।१९

लास्येनद्विविधोवादः[१] युग्मंयौवतमेवच।
यौवतंसिद्धशास्त्रं च युग्मंनिन्द्यं च सर्वदा।।२०

त्रिधायौवतमुख्यं स्यात् लघुनृत्यं मनोहरा।
विकटंपार्वणंनृत्यं कौतुकास्य प्रदायकम् ।।२१

ललितंकोमलाङ्गेन कुमार्य्याः अङ्गचालनं।
नानाकृति समायुक्ता बन्धः राजगणः प्रियः।।२२

एताश्चनृत्यभेदाश्च पूर्वाचार्य्यैः समर्थितः।
प्रसिद्धान्यासयुक्तेन मुद्राकरण सम्मताः।।२३

---

१. M.S.S. 2 ख्यातः

पादमुद्राभेदाः

चतुर्विधापादमुद्रा[१] लास्य नृत्ये विशेषतः।
पादक्रमेकरन्यासः षोडशः षोडशः क्रमात् ।।२४
कुम्भमुद्राधनुमुद्रा स्तम्भमुद्रा च चालने।

उत्तोलने महामुद्रा[२] बिषमे पादचालना।।२५

कुम्भमुद्रा

पादद्वयसमायुक्तं[३] बिपरीत मुखाकृतिः।
कुम्भाकारःपाददण्डे मुद्रा आद्या प्रकीर्त्तिताः।।२६

धनमुद्रा

एकपादस्थितदृढ़ोऽपरेण बक्रभावतः।
चालनमेकमेकेन धनुमुद्रा च मध्यमा।।२७

स्तम्भमुद्रा

पादद्वयंदण्डभावे सुदृढंह्यङ्गचालनं।
लास्याङ्गमृदुभावेन स्तम्भमुद्रा विशेषतः[४]।।२८

उत्तोलनं

क्षणिकाविषयमाभङ्गी उग्रनृत्ये च उत्तमां।

---

1. M.S.S. 2 - भंङ्गी
२. " - उत्तोलने सदाध्येयं (पाठान्तरं)
३. " - समाने च
४. " - चरेत् सुधीः

उत्तोलित महामुद्रा[1] न कुर्य्याद् युग्मपादकैः[2]।।२९

कथिताः पूर्वः शास्त्रेषु नानाचरण साधनम् ।
समंविषम सूच्यग्रं घटिता तलसञ्चरा।।३०

मर्दितं घुर्ण्णनंचैव पार्श्वगंसमकुञ्चनं।
मात्रगौणे नामभेदे प्रसिद्धं च चतुर्विधं।।३१

एकैकेन च न्यासेन करकट्यादि सन्निभम् ।
सम्भवत्यावृत्तिं सर्वं भङ्गिंभावं न संशयः।।३२

सदावृत्त्या च सद्वृत्त्या मुद्राहीने न निष्फला।
प्रवक्ष्याम्यत्र भेदाश्च करन्यासःविशेषतः।।३३

पञ्चदशक्षेत्राणि

नानाविधकरन्यासः प्रतिथा[3] भावव्यञ्जना।
ख्यातंपञ्चदशक्षेत्रं करपुटार्थबोधने।।३४

सम्मुखेपृष्ठदेशे च उद्ध्वेशिरसि मध्यमे।
कपोलबद्धपुटौच स्कन्धेनाभिकटिद्वये।।३५

कोरकच्छिद्रस्थानेन उरुपार्श्वद्वये तथा।
पृष्ठभूमौदिव्यभूमौ पार्श्वभूमौतथाम्बरे।।३६

---

१. M.S.S. 2 – पदन्यासः
२. " – पादयुग्मकम्
३. " – सापेक्ष

इतिश्रेष्ठकरक्षेत्रं नृत्यज्ञानार्थीवन्दितम् ।
न्यासक्रमंदिव्यभेदं[१] गोप्यं गोप्यतरंमहत् ।।३७

चतुर्विधामुद्रा

मुद्राचतुर्विधाश्रेष्ठाः संयुताऽसंयुता तथा।
पुटिताभावयुक्तेन विषमा पद सन्निभा।।३८

एकक्षेत्र प्रभावेन[२] समक्षेत्र[३] प्रदर्शयेत् ।
संयुता न्याससंसिद्धा सङ्गीतभावपेक्षणि।।३९

पृथक् पल्ली समायुक्ता नानाकारैः प्रकाशिता।
भावव्यक्तस्वरूपयाऽसंयुताचित्त हारिणी।।४०

युक्तपल्लिद्वयक्षेत्रे नानाभाव समन्विते।
प्रसिद्धापुटितामुद्रा विषमापद स्पर्शने।।४१

न्यासक्रमंप्रवक्षामि संयुतादि यथाक्रमम् ।
हेतुःकरणयाप्रोक्ताभावना च पृथक् पृथक् ।।४२

ध्वजमुद्रा

अङ्गुष्ठदण्डरूपेण पार्श्वगं चतुराङ्गुलैः।
ध्वजसंयुतमुद्राख्यं सूचितं विजयादिभिः।।४३

---

१. M.S.S. 2 – पदन्यासः
२. ” – पादयुग्मकम्
३. ” – सापेक्ष

सर्पशिरा

अङ्गुष्ठपल्लवैर्युक्तं कनिष्ठातर्जनींविना।
मध्यमाऽनामिके वक्रे मध्येकरतलाश्रिता।।४४

एवंसर्पशिरामुद्राभयउद्वेग दायिनी।
लास्येभावमयं नित्यं नेत्रचालनपेक्षणी।।४५

बलया

बद्धसर्वांगुलौ वक्रे तर्जन्यग्रे च बृद्धकं।
बलयाकारमुद्रा सा एकाग्रं दृष्टिभावना।।४६

करतालगतावक्रे अंगुष्टेद्वितीयावली।
तर्जनीयुक्तग्रन्थ्यग्रे उर्द्धवगा अंगुलित्रयी।।४७

ध्यान

ध्यानं ध्यानरता मुद्रा[१] लास्याऽग्रेविषमेतथा।

अभया

विपरीत मुखाकारे अभया सा प्रकीर्त्तिताः।।४८

बोधिका

दण्डाकारेतर्जन्योग्रं सम्मुखे मध्यमादयः।
करपृष्ठमुखी वृद्धा प्रबोधनार्थबोधिका।।४९

अङ्कुशा

तर्जनीकिञ्चिदुर्द्धवस्तु क्षुद्रा[२] क्षुद्रतरंतथा।
मध्यमानामिका किञ्चित् निम्नगाधरणींप्रति।।५०

---

१. M.S.S. 2 - ख्यातं
२. " - वक्त (पाठांतरं)

स्थिरांगुष्ठाङ्कुशामुद्रा कर्षिणी तालनर्त्तने।
करायत्तं मुखायत्तं सर्वायत्तं स्वभाविका।।५१

भया

सकुञ्चिते यथास्थाने समस्तांगुलि निम्नगा।
एवंऽभयाशुभामुद्रा वरादि दान व्यञ्जिका।।५२

बामांगुष्ठ समायुक्ते चतुर्थ्याकरपल्लवे।
पञ्चम्यासह युक्तेन उर्द्धवं दण्डसमंद्वयम् ।।५३

दण्ड

दण्डमुद्रा महामुद्रा दण्डदीक्षाप्रदर्शने।
अङ्कुशाभगिनीदक्षे सर्वदा सहचारिणी।।५४

लुलिता

भुजदण्ड दृढ़ानिम्रा तिर्यक् पल्लिद्वयेतथा।
लुलिता नृत्य प्राग्भागे पार्श्वे क्षेत्रे[१]प्रदर्शयेत् ।।५५

निषेधा

भयामुद्रा समान्यस्ता करचालन तत्परा।

निषेधा

भयामुद्रा समान्यस्ता करचालनं तत्परा।
निषेधाज्ञापिकामुद्रा संगीतभावबोधिका।।५६

धिक्कार

कुञ्चितास्फारिताशीघ्रा निर्मिता क्षणिका सदा।
वलयासमुमुद्रासाधिक्कारा न्यासमध्यमा।।५७

---

१. M.S.S. 2 पार्श्वक्षेत्र

विरोधा निर्देशिका

ताम्बुला

बिरोधामुष्टिभेदाश्च तर्जन्योर्द्ध्वे निवेशिका।[१]
ताम्बुलातर्जनीवृद्धायुक्ते अति सुशोभना।।५८

करतलगता तिर्यक्[२] मध्यमा विपरीतगा।

वस्त्रा

एवंवस्त्रकरन्यासः देवनृत्ये मनोरमा।।५९

षोडशः संयुतामुद्रा पल्लिमेकां समाश्रिता।
लास्यंतालमयंनृत्ये प्रसिद्धा आद्यभावना।।६०

शृणुतांऽसंयुताभेदाः पल्लिक्षेत्र पृथक् पृथक्।
सहताल समावेशं गौणभाव प्रकाशिनी।।६१

अष्टाविंशति भेदानांऽसंयुताचित्तहारिणी।
करक्षेत्रंविनाहीना पल्लिक्षेत्रक्रमंशृणु।।६२

समविषम संवेगा नानाक्षेत्र समाश्रया।
कथिता करक्षेत्रा सा तद्ज्ञानहीननिष्फला।।६३

समाकारेयथा मुद्रा प्रभेदे मृदुचालना।

समक्षेत्र

समभङ्गीमयंक्षेत्रं समानाम स उच्यते।।६४

---

१. M.S.S. 2 – निदशिका
२. " – किधित

भिन्नाभिन्नपृथक्क्षेत्रं पृथक्न्यास समाहितं।
क्वचिद्धीराअधीरापि क्वचिद्वेगपरायणा।।६५

क्वचित् बामकरं उर्द्धवंक्वचिद्दक्षकरंभूमौ।*
क्वचित्तक्षकरः पश्चात् वाम सम्मुखक्षेत्रजा।।६६

एतेषांविषमाभङ्गी नृत्यारम्भे तथान्तरे।
उग्रनृत्ये प्रसिद्धा सा युग्मनृत्ये विशेषतः।।६७

सहभावप्रकाशेन क्षणिकं परिवर्त्तनं।
शृङ्खलारहितः न्यासः वेगनाम्ना स उच्यते।।६८

क्रमेणैवं प्रवक्षामि मुद्रा असंयुतादयः।
मुख्यक्षेत्रं करक्षेत्रं मित्र मुद्रा तथैवच।।६९

हंसपक्ष

हंसपक्ष समन्यासः[१] कटिपार्श्वद्वयेऽभये।
पक्ष्याकारकृतापल्ली उर्द्धवावृद्धाच पञ्चमा।।७०

अपरात्र्यङ्गुली निम्ना कुटिला पल्लवं प्रति।
नृत्यादौरचितामुद्रा पादकुम्भाकृतिध्रुवं।।७१

गोमुख

मध्यमाऽनामिके युग्मं अग्मुंष्ठाग्रे सुकुञ्चिते।
शृङ्गाकारेउर्द्धव देशे कनिष्ठातर्जनींप्रति।।७२

* भूमौदक्षकर क्वचित्
१. M.S.S. 2 – न्यासेत्

धेनोर्मुखाकृतिर्मुद्रा सम्मुखे दक्षिणेभुजं।
तत्वामपार्श्वभागेन शृङ्गवत् समदर्शयन् ।।७३

कुम्भमुद्राःस्थिता पादाः नृत्याद्ये वक्रदर्शनं।
पार्श्वभूमौवद्धदृष्टि उग्रेण सुसमाहिता।।७४

चतुर

करनिम्नसमायुक्ता अङ्गुष्ठाकुटिलीकृता[१]।
सम्यक्तीर्यक् द्बितीया च समभावेऽङ्गुलित्रयं।।७५

वामहस्तकटिक्षेत्रे दक्षिणः स्कन्ध पृष्ठतः।
वेगातालक्रमायुक्ता विपरीताकृतोत्तमा।।७६

चतुरन्यासभेदाश्च ताण्डवेप्रियदर्शनं।
उर्द्धवकरस्वभावेन पादस्योत्तोलनं क्रिया।।७७

शरपेक्ष

सम्मुखेमुष्टियुत्तेन दीर्घेवामकरे सुखं।
दक्षकर्ण्णमूलेन्यस्तः करमुष्ट्या मृणालवत् ।।७८

शरक्षेपाकर मुद्रां पदमुद्राच सायके।
दृष्टिर्वामकरे न्यस्ता गीतभावार्थ दायिनी।।७९

अर्द्धचन्द्र

बिष्फारिततथाङ्गुष्ठावृद्धः तर्जनीह्यर्द्ध चन्द्रवत् ।
सर्वाङ्गुल्या समावेशे नाभौद्ध्वे च प्रदर्शयन् ।।८०

---

१. M.S.S. 2 – कुटिलाकृति

क्षिप्ताङ्कुशातथा दण्डा शिरः पार्श्वे व्यवस्थिते।
मित्रमुद्रा इति ख्याता उग्रनृत्ये मनोरमा।।८१

नृत्याग्रेविषमांघ्रिश्च वेगवान् ताल भञ्जने
एवं ताण्डवमुद्राख्य, दृष्टिः स्वगुल्फदर्शने।।८२

निकुञ्चक

करौच कटितुल्यं स्यात् चरणौकलशोपमौ
पादकरकटिपल्लिः सहतालेरसक्रमात्[१]।।८३

एषानिकुञ्चकमुद्रा संघनृत्ये सुशोभना
दृष्टिर्निबद्धा नाभौ वा सम्मुखे च पुनःपुनः।।८४

चतुर्मुख

अङ्गुष्ठस्याग्रभागेन तर्जन्यग्रस्यस्पर्शनं
तर्जनीप्रथमापर्वे मध्यमाग्रसमाश्रितः।।८५

मध्यमाद्वितीयापर्वेऽनामिकाग्रेषुयोजयेत्
नाभिकातृतीयापर्वे वेदमुख्य विधानतः।।८६

क्षेत्रवक्षोभये पार्श्वे नृत्यप्रान्तेविधानतः
घटे वा स्तम्भन्यासेन पाददृष्टिः पदद्वये।।८७

मृगाक्षा

अङ्गुष्ठतर्जनीयुक्तः सम्मुखे[२] अङ्गुलित्रयं
समान्तरालभावेन वक्षमध्येप्रदर्शयेत् ।।८८

---

१. M.S.S. 2 – सहतालेन चालयेत्

२. M.S.S. 2 – स्वभावे

अंगाभिनय की विविध मुद्राएं

उद्वृत्त

तलसंघट्टित

लोलित

शकटास्य

वृषभक्रीडित

एलकाक्रीडित

विष्कम्भ

उपसृत

विष्णुक्रान्त

अपक्रान्त

उरूद्वृत्त

अञ्चित

संभ्रान्त

मदस्खलितक

अर्गल

रेचकनिकुट्टक

नागापसर्पित

गंगावतरण

प्रसर्पित

पार्श्वक्रान्त

निवेश

नितम्ब

हरिणप्लुत

सिंहविक्रीदित

सिंहाकर्षित

जनित

अवहित्थ

दण्डपांद

संनत

सर्पित

मयूरललित

सूचीविद्ध

प्रेङ्खोलित

स्खलित

परिवृत्त

करिहस्त

पार्श्वनिकुट्टक

तलसंस्फोटित

गण्डसूचि

सूचि

अर्धसूचि

गजक्रीडितक

पार्श्वजानु

गरुडप्लुत

गृध्रावलीनक

विवृत्त

विनिवृत्त

ललाटतिलक

विवर्तित

अतिक्रान्त

विद्युद्भ्रान्तक्रिय

निशुम्भित

उरोमण्डल

विक्षिप्त

वृश्चिकरेचित

वृश्चिककुट्टित

लतावृश्चिक

वैशाखरेचित

चक्रमण्डल

आवर्त

कुञ्चित

दोलापाद

तलविलासित

व्यंसित

चतुर

क्रान्त

भुजंगत्रस्तरेचित

भुजंगाङ्चित

आक्षिप्त

उद्घट्टित

दण्डरेचित

वृश्चिक

मृगाक्षानृत्यसापेक्षा,चरणौ सायकाकृति
दृष्टिःविष्फारितानेत्राः सम्मुखावद्धभावतः।।८९

शुकचञ्चु

शुकचञ्चावृतिर्मुद्रा चिवुकेवक्रतर्जनी
मध्यमाङ्गुष्ठयुक्तेन दक्षिणेकर्णसन्निधे[१]।।९०

धन्वाकारेपदन्यासः दक्षिणपाद वक्रतः
वक्रपादगतादृष्टिः प्रसिद्धाभङ्गीमुत्तमा।।९१

आरत्रिका

अस्त्रपल्लिसमन्यासः दक्षिणकरपल्लवं
घण्टामुष्टिर्विबामं सन्निधौ वामजानुनी।।९२

दक्षिणकरसम्मुखे दृष्टिर्वद्धा तथैव च
उत्तोलित पदन्यासः अर्च्चानृत्य शुभं तथा।।९३

क्षिप्ता

पृथगङ्गुलिसर्वाणि अंगुष्ठेविपरितगे
कनिष्ठासमभावेन स्व बपुर्दिगमाश्रया।।९४

विक्षिप्ताग्रागुंलित्रीणि क्षिप्ता मुद्राच ताण्डवे
समभावेपृथक्रूपे कटिर्दक्षे शिरोर्द्धवगे।।९५

विषमोत्तोलिता पादः दृष्टिर्विकटसम्मुखे
निर्देशिकाङ्कुशामुद्रा सर्वदा सहचारिणी।।९६

---

१. M.S.S. 2 दर्शयेत्

कुञ्जरवक्त्रा

विषमागजवक्त्रा सा चतुरांगुल बक्रतः।
अंगुष्ठकुञ्चितानिम्ने दक्षिणेशिरउर्द्ध्वगा।।९७

वामेविम्बोष्ठन्यासेन वामपार्श्वे तदाकृतिः
वीरासनेस्थिताः पादाः दृष्टिरावद्ध शीर्षयोः।।९८

श्रुतिकूला

कर्ण्णमाच्छाद्यवस्त्रेण दक्षिणंकटि सन्निधे
अथवाध्यानन्यासेन कर्ण्णपार्श्वेसुशोभना।।९९

केनचित्शब्दमाकर्ण्य चकिताभविता यथा
तथादृष्टिलयंभावमाचरेत् नट पुंगवः।।१००

उत्तोलिता

दण्डपादेस्थिता दृढ़ा तालेन मृदुचालनं
पार्श्वकरद्वयो न्यस्ता अभयाकर पल्लिवत्।।१०१

जलोत्तोलित न्यायेन पार्श्वमारभ्य स्कन्दतः
क्षणाचरित मुद्रा सा पार्श्वदृष्टिः क्षणे क्षणे।।१०२

शिवकरा

प्रथमाद्वितीया क्षुद्रा स्वभावेहृद मण्डले
मध्यमानामिका उर्द्ध्वे अपरंकरमाश्रया।।१०३

परस्पर यथास्थाने स्पर्शनं समभावतः।
दृष्टिमुद्रागृहेवद्धा कुम्भपादे शिवंयथा।।१०४

आसनं

आसनंगौणमुद्रा सा केवलाभिनयोत्तमा
संगीतवचनाभावाः[1] प्रकाशार्थं च गायने।।१०५

कटिसम्मुखभागेन कराणां संप्रसारणं[2]
एवंआसनमुद्राख्यं ख्यातादेवार्च्चनेशुभा।।१०६

निवेदना

वद्धाञ्जलिसमंन्यासा संगीत भाव गामिनी
कटिभागेकृतामुद्रा नयनं संमुखं प्रति।।१०७

एताः समर्पणंमुद्रा नृत्यप्रान्तेच संगीते
कथिता सा महामुद्रा पूजनार्थे विशेषतः।।१०८

पादवलया

एकपादस्थिताद्दृढ़ा अपरा जानुस्पर्शने
तद्पार्श्वकरतर्जन्यावक्रे वलयकर्षिणी।।१०९

अभिमानासमामुद्रा अपरंचिबुं प्रति
मुग्धादृष्टिऽधरे न्यस्तामुग्धमूर्त्तिर्नसंशयः।।११०

विभङ्गा

स्वभावेनकरौन्यस्तौ हृदयसमीपे दृढ़ं
पादतल कुटिलेन कर्ण्णभागे उपस्थितौ।।१११

---

१. M.S.S. 2 – रचना

२. M.S.S. 2 – संप्रसारयेत्

दृष्टिःसंमुखमावद्धा विभंगा बन्धउत्तमा
कुमारीनृत्य संख्याता न कुर्य्यात् षोड़शोत्तरे।।११२

षोटला

प्रतिकराङ्गुलौन्यासेत् उपर्य्युपरिचन्द्रवत्
वाहुद्वयसंमुखे च दण्डाः वक्षोग्र सन्निधौ।।११३

पोटलावृकतिमुद्रा सा श्रेष्ठतालप्रदर्शने।
लययुक्ते महामुद्रा न्यासः[१] नृत्ये विचक्षणः।।११४

विराज

दक्षिणकरचक्रेण पुरोभागे मृणालवत् ।
बामकरागुंलौ पृष्ठे स्कन्ध देशेतिशोभने।।११५

अर्द्धचन्द्रसमंन्यस्ता न्यंगुल्यानि सुखेन च।
एवं मुद्रा सामाख्याता बिराज[२] न्यासमुत्तमम् ।।११६

गोपना

सायकापदमाक्रम्य कटिवक्रोत्तरे दृढ़े।
सर्पशिराकृतिस्कन्धे निबद्धंदक्षीणंकरं।।११७

वाममध्यमा युक्तेन करग्रन्थ्यग्रशोभने।
दृष्टीर्भूमौच मुग्धेन नारीनृत्ये विशेषतः[३]।।११८

---

१. M.S.S. 2 – लास्य
२. M.S.S. 2 – विराल
३. M.S.S. 2 – गोपनाख्यविशेषतः

मदला

कलशाकारपादानां कुटिलंवामपल्लवं।
अङ्गुल्यसमभागेन वामपार्श्वे विशेषतः।।११९

दक्षिणकरतद्भावे दक्षिणकटिपार्श्वयोः।
दृष्टिर्दक्षकरौ बद्धा मर्दलान्यासमुत्तमा।।१२०

नन्दावर्त्ता

वामपादस्थितादृढ़ादक्षोपद्मासनोपमा।
उभयकरसंयोगाकर्षणंआसनंप्रति।।१२१

वामहस्तेपदप्रान्त दक्षिणजानुस्पर्शने।
एवंछन्दाकृतिमुद्रानन्दावर्त्ता न संशयः।।१२२

तरङ्गा

कुम्भमुद्रा समंवामदक्षिणौलम्बरज्जुवत् ।
दक्षकरस्तथालम्बा दक्षिणंचरणंप्रति।।१२३

वामउर्द्ध्वगतीरम्ये अर्द्धचन्द्राकृतिंकरः।
दृष्टिर्दक्षिणपादेन तरङ्गासौम्य दर्शनम् ।।१२४

कुञ्चना

छन्दाकारेकराङ्गुल्यौ करनिम्नप्रदर्शनं।
शिरोदेशेछत्रभावे दर्शनंसमकुञ्चनं[1]।।१२५

अभिमाना

वामतर्जनीओष्ठाधः स्पर्शने अभिमानिका।
दक्षकरशिराभागे कुटिले दानपल्लिवत् ।।१२६

---

१. M.S.S. 2 – दर्शयेत्समकुञ्चने

अभिमाना सा प्रसिद्धा रास रासेश्वरीप्रिया।
ललितानामिकामुद्रा गान्धर्वन्यासमुत्तमम् ।।१२७

एताश्चन्यासभेदाश्च उडू गान्धर्वलक्षमं।
असंयुतादि मुद्राणि आचरेत् सावधानतः।।१२८

विपरीताकृतामुद्रा करणं विकलं भवेत् ।
विकृतकरणं नृत्ये निन्दनीयं पदे पदे।।१२९

भेदान्तरं शृणुअत्र पुटिता न्यासमुत्तमा।
नृत्यशास्त्रेप्रसिद्धा सा नट्यानन्द प्रदायिका।।१३०

पुटिताद्विविधाप्रोक्ता उडू गान्धर्वलक्षणे।
पुटितावन्धपुटिता नृपाग्रेच विलक्षणं।।१३१

पुटिता

उभयकरयुक्तेन उत्कटंमुखव्यञ्जका।
विकटंनृत्यभावेन पुटिता उग्रदर्शना।।१३२

वन्धपुटिता

एककर समायुक्तंकरे पादादियोजना।
वन्धपुटिता नाम्ना सा कुटिला अङ्गचालनम् ।।१३३

मुखव्यञ्जना

अथप्रसङ्गभेदेन चतुर्धा मुखव्यञ्जना।
वन्धलास्यं तथाउग्रं मृदुओष्ठ प्रदर्शनम् ।।१३४

विरहदुःखभावेन स्मितोष्ठलास्य व्यञ्जना।
भावभेदे ओष्ठरुद्धेः नानाभावं प्रदर्शयेत् ।।१३५

इषत् हास्यं[१] इषद्लास्यं इषदामृदुभाषिताम् ।
उग्रंविकट व्यादानंत्रिधामुग्राङ्गव्यञ्जना।।१३६

एतेषांव्यञ्जना दिब्यं पुटिता सहचारिणी।
शृणुभेदत्रयंमुख्यं पुंसोनृत्ये प्रयोजनम् ।।१३७

उग्र

केवलंदशनं दृश्यं स्फारिते नयनंतथा।

व्यादान

कथितंउग्रमेतेषां मुखव्यादाने व्यादनम् ।।१३८

विकट

जिह्वाललनयुक्तेन ख्याताविकट व्यञ्जना।
पुटितान्यासभेदेन उग्रनृत्येप्रशंसिता।।१३९

पुटिताद्वादशाभेदा वद्धा कर्कटिकार्च्चना।
आवाहनामेषयुद्धा गम्बुजाकुम्भका तथा।।१४०

भेकासना महाशङ्खा प्रख्याता मग्ना एव च।
करकच्छपिकामुद्राप्रणतादि यथाक्रम् ।।१४१

वद्धा

वीरासना अधिरूढ़ा वद्धोष्ठे नेत्रमुद्रिते।
सर्वाङ्गुलिसमाबद्धं तलंकरतलाश्रया।।१४२

---

१. M.S.S. 2 – इषत्हास्यसदालास्ये कदवा मृदु भाषणम्

एबंवद्धामहामुद्राः स्थिरभाव विचारता।
पुरुषस्याङ्गसापेक्षे[१] दुरूहंभावसाधनम् ।।१४३

कर्कटिका
तिर्यक्वीरासना रूढा उभयदन्तदर्शने।
हृदयमण्डले न्यासेत् न्यासकर्कटिका महत्।।१४४

अङ्गुष्ठद्वयसम्बन्धा[२] कर्कटपादन्यासवत् ।
पादःकुम्भसमं न्यासेत् उग्रभाव समन्वितः।।१४५

अर्च्चना
कनिष्ठाग्रे कनिष्ठाग्रंचतुर्थ्यग्रेचतुर्थकं।
मध्यमया सहयुक्ता अर्च्चना कमलंयथा।।१४६

यथा आवाहनंमुद्रा वीरासनसमाश्रिता।
अर्च्चनञ्च पृथक् न्यासेत् केवलं कुक्कुटासने।।१४७

मेषयुद्धा
द्वयंपादतलंयुक्तंआसनेसमवेशनं।
हृददेशेसमावेशेमुष्टिपृष्ठेतथैव च।।१४८

स्फारितनयनाःयत्रउभयदन्तगह्वरं।
मेषयुद्धाइतिउग्रं नृत्यंतत्रमनोहरम् ।।१४९

---

१. M.S.S. 2 – पुरुषस्याङ्गे कर्त्तव्यं दुरूहभाव दर्शयेत्
२. M.S.S. 2 – युक्तेन
३. M.S.S. 2 – दन्तोभय प्रदर्शने

अर्धरेचित

ऊर्ध्वजानु

कटिभ्रान्त

छिन्न

पादापविद्धक

भ्रमर

दण्डपक्ष

नूपुर

ललित

निकुट्टक

अर्धनिकुट्टक

विक्षिप्ताक्षिप्तक

अपविद्ध

समनख

स्वस्तिकरेचित

मत्तल्लि

अर्धमत्तल्लि

वल्लित

तलपुष्पपुट

धपा:स्वस्तिक

वर्तित

मण्डलस्वस्तिक

लीन

उन्मत्त

वलितोरु

स्वस्तिक

अर्धस्वस्तिक

दिक्स्वस्तिक

पृष्ठस्वस्तिक

आक्षिप्तरेचित

अलात

भुजंगत्रासित

कटीभ्रम

कटिछिन्न

घूर्णित

निकुञ्चित

गम्बुजा

ध्यानासीना समाध्यानं शिरोर्द्ध्वे पुटिताःकराः।
करमध्ये शिरोदेशं संमुखेयोजयेत्नटः।।१५०

एषागम्बुजमुद्राख्या केवलं शिर दर्शनं।
मुखमण्डलदृश्येन जायते न्यास विकृतम् ।।१५१

कुम्भका

कुम्भपादसमायुक्ता कुम्भवत् शिरसि करौ।
छन्दवत् अङ्गुलिः सर्वाःकुम्भकान्यास उच्यते[१]।।१५२

भेकासना

विषमपादयुक्तेन आसनं भेकपादवत् ।
करद्वयं मध्यभागे उरजौयत्र[२] निम्नगे।।१५३

संस्थाप्य पादभागेन विपरीत दिशिक्रमात् ।
एषा भेकासना मुद्राउग्रनृत्ये विशेषतः।।१५४

नृत्यान्ते चालिता मुद्रा स्फारिता नयन द्वयं।
उग्रं दशन युक्ता सा दृष्टिः संमुखमाचरेत् ।।१५५

महाशङ्खा

वद्धदक्षकरश्रेष्ठं आवर्तौ वामदक्षिणौ[३]।
दक्षाङ्गुष्ठे समबद्धा वामाङ्ग मध्यमाङ्गुलम् ।।१५६

---

१. M.S.S. 2 – मध्यमा
२. M.S.S. 2 – उरजनिन्मगा
३. M.S.S. 2 – मुष्ठपाश्वगे

युग्माङ्गुलिमुखं युत्तंचिबुकंदृढ़ बन्धने।
कुटिलपादन्यासेन शङ्खामुद्रा भविष्यति।।१५७

प्रख्याता

उग्रनेत्रमुखंपादावीरछन्दे विनिर्मिताः।
स्वभाव बद्ध न्यायेन कट्यां करनिबेशयेत् ।।१५८

मित्रशिवकरामुद्रा अथवा ध्यान पल्लिवत् ।
दृष्टिमुद्राङ्कितक्षेत्रे प्रख्याता सा विधीयते।।१५९

मग्ना

वीरासना समारूढ़ा दक्षिणंवक्रभावतः।
दक्षिणकरपृष्ठांशे वर्द्धयन्दण्डखण्डवत् ।।१६०

वामसंमुखतः[१] युग्मंनयनंसंमुखंप्राति।
एवंमग्नामहामुद्रा उग्रनृत्येप्रशंसिता।।१६१

करकच्छपिका

पादकच्छपिकन्यायं पादयुग्माग्रे[२] स्थापितं।
वक्षोभूमिसमायुक्तंमुखंसंमुखमाचरेत् ।।१६२

करकच्छपिकामुद्रा युग्मनृत्ये मनोरमं।
एवंन्यासो न कुर्य्याद्वै भद्रनृत्ये नृपालये।।१६३

---

१. M.S.S. 2 – तत् रम्यं
२. M.S.S. 2 – वेशितं

प्रणता

प्रणताशेषमुद्रा[1] सा नृत्यन्तो अभिवादने।
पाददण्डसमायुक्तं प्रणता प्रणिपात वत् ।।१६४

एबंपुटितभेदानां लास्योग्रे न्यासमुत्तमा।
अन्तेश्रृणुप्रवक्षामि दशभेदा[2] विशेषतः।।१६५

वन्धनृत्यमहाघोरं नटी कष्ट प्रदायिनी।
किशोरअङ्गसापेक्षा विषमं यौवनान्तरे।।१६६

गगनाद्विमुखाश्चैव तोरणाशयनातथा।
क्षुद्राशूलावृताङ्गाश्च डमरुमिथुनोदया।।१६७

प्रदीपादीपभेदश्च[3] नानाक्षेत्र समाश्रया।
शृणुत्वं दशभेदाश्च बन्धः राजगण प्रियः।।१६८

पादंविषमसंस्थान करौ कुटिलताश्रयौ।
पादकर समायुक्तं नृत्यं कष्ट प्रदायकं।।१६९

गगना

वामकरःभूमौयुक्तः वक्षोरु समभावतः।
दक्षपादसमायुक्तं पृष्ठे इस्ताग्रे छन्दवत् ।।१७०

---

१. M.S.S. 2 – आचरेत प्रणता मुद्रा
२. M.S.S. 2 – विषमादशभेदकम्
३. M.S.S. 2 – संयुक्त

मुखसंमुखमाप्रोति लास्यभावे[१] समन्ततः।
एवंगगन बन्धो सा सर्वानन्द प्रदायका।।१७१

द्विमुखा

वामदक्षिणपादयो स्फारिता वामदक्षिणे।
करप्रदीपयुक्ता सा दिव्यानन्द प्रदायिनी।।१७२

तोरणा

पादद्वयसमंभावे पृष्ठेकर समंतथा।
एवंतोरणन्यासा सा मुखक्षेत्र मनोरमा।।१७३

शयना

तोरणंसममुद्रा सा पादैकसंमुखंप्रति।
करेणपृष्ठदेशे च शयना शून्यलोचना।।१७४

क्षुद्रा

पद्मासन समंपादं छन्दवत् कर युगयोः।
पृष्ठेकरयुगंन्यस्तं क्षुद्रा बन्ध मनोहरा।।१७५

त्रिशुला

भूमौपरिकटिंस्थाप्यं पादं गगनमाश्रितं।
जानुमध्येसमं पृष्ठं मस्तकं समदर्शयन् ।।१७६

करंजानुसमाबद्धं बन्धकष्टप्रदं ध्रुवं।
विनागुरूपदेशेन न कुर्य्यात् त्रिशूलादयः।।१७७

---

१. M.S.S. 2 – सदेशे भाव प्रदर्शयेत्

वृताङ्ग

कटिभूमिंसमास्पृश्य हस्तंशिखेर्द्धवे न्यासितं।
पृष्ठेकुटिलभावेन पादंहस्तेनयोजयेत् ।।१७८

एवंवृतौगमुद्राख्या शरीर श्रमदायिनी।
मुखाग्रे प्रदीपंदिव्यं कुचाग्र धरणीं प्रति।।१७९

डमरु

पार्श्वोभयेसमानेशंचरणं गगनं प्रति।
पाददण्डे समाबद्धा मुद्राप्रणत पल्लिवत् ।।१८०

डमरुख्यातमुद्रा सा बन्धान्ते अभिनन्दनं।
एवं प्रबन्धता मुद्रा प्रदीपाशुभदायिनी।।१८१

पादद्वयेप्रदीपञ्च करमध्येच मस्तके।
मुखयुक्ते तथा पञ्च प्रदीपाशुभदासदा।।१८२

मिथुनाश्रया

युग्मनृत्ये कृते बन्धे दिव्यमिथुनमाश्रया।
उभयंतोरणंमुद्रा संलग्रे माचरेत्यदि।।१८३

एताश्चदशभेदाश्च बन्ध क्लेशप्रदायिनी।
गुरुइष्टंविना त्यक्तं वर्जितंसाधनं विना।।१८४

नानाभङ्गी इतिख्यातंमुद्राभेदा विशेषतः।
ग्रन्थेनृत्यगतेकृत्यं उद्गान्धर्वलक्षणं।।१८५

सपादान

गीतानुपेक्षितं वाद्यं वाद्यानुपेक्षितंलयः।
लयानुपेक्षितस्तालो नृत्य सर्वसमन्विताः।।१८६

बद्धाबद्धद्वयं भेदं नृत्यज्ञाने विशेषतः।
बद्धनृत्येसदाध्यायेत् गतिर्नियमचारणः।।१८७

अबद्धेनियमोनास्ति नास्त्येव करणादयः।
मस्तकनयनदृष्टिः सवाङ्गचालनंतथा।।१८८

बद्धनृत्यंसमाख्यातं काव्यवस्तुप्रदर्शने।
काव्यविषयभावेन मुद्राख्याता भविष्यति।।१८९

काव्य वाक्यादिबद्धेन मुद्रा दृष्टिश्च चालनं।
प्रदर्शनंइतिमुख्या उड्रदेशेऽतिशोभनं।।१९०

भिन्नाभिन्न क्रमभेदाः पूर्वशास्त्र समर्थिता।
तथापिदेशभेदेन नृत्ये पार्थक्य जायते।।१९१

देशभेदेनृत्यप्रशंसा

मागधीशौरसेनीच कर्ण्णाटकेरलादयः।
गौड़पञ्चनदश्चैव उड्र नृत्यादि सप्तधा।।१९२

मागधंभावमुख्यंच शूरसेन्यङ्गचालने।
कर्ण्णाटंसर्वरूपेण केरलन्यासमुत्तमं।।१९३

युग्मंनृत्यरताः गौड़ पञ्चनद्याङ्ग नर्त्तने।
भावप्रदर्शनेउड्रंख्यातंअत्र न संशयः।।१९४

गोप्यगोप्यतमा पुण्या नृत्यविद्यार्थ दायिनी।
धर्मार्थकाममोक्षादि सर्वसिद्धिप्रदंशुभं।।१९५

श्रद्धावान् लभते विद्या बुद्धिहीनेन निष्फलं।
बुद्धिमानपेक्षतेनित्यं गुरूपदेशतः सदा।।१९६

विनागुरूपदेशेन न सिद्धिः न च साधनं।
निष्फलंभवतिसर्वं इष्टमन्त्रजपं विना।।१९७

मुनिंनारदमाराध्य हृदिहरीहरादयः।
सरस्वत्यार्च्चनं नित्यं कर्त्तव्यं महतांसदा।।१९८

सरस्वती तु सायाह्ने सन्ध्यायां विष्णुरूपिणी।
नीलेन्दीवर श्यामानीलकुञ्चित मूर्द्धजा।।१९९

नित्याराध्य देवता
निर्णयम्

चतुर्भुजाचैकवक्त्रा पद्मपत्रायतेक्षणा।
शङ्खचक्रगदापद्मं धृत्वा या जयदाशुभा।।२००
पीताम्बरदधात् च ध्यायेत् विष्णुस्वरूपिर्णीं।

पद्म
नीलपीठे स्थितारम्ये सामवेद स्वरूपिर्णीं।।२०१

वरदा गरुडारूढ़ां सर्वसिद्धि प्रदायिनीं।
एवंध्यात्वामहाशक्तिं नृत्याग्रे नटीसर्वदा।।२०२

पुनश्च ध्यानरूपेण ताण्डवं सप्तचिन्तयेत् ।
शृणुगोप्यतमंरूपं सप्त ताण्डव लक्षणाः।।२०३

---

१. M.S.S. 2 – पद्म

आनन्दताण्डवं सन्ध्याताण्डवं मातृताण्डवं।
गौरीकाली त्रिपुरा च संहारताण्डवं तथा।।२०४

आदौरङ्गालये ध्यात्वा जय स्वरूप सिद्धिदं।
पुनश्च भावनांकुर्य्यात् नट माहेश्वरं विभुं।।२०५

पुषणंजयनामानं वरदाक्षस्तुसन्ततेः।
शङ्खचक्राङ्कितंहस्तं नमामिजयदेवता।।२०६

नृत्यशास्त्रमिदं रम्यं मृगचंद्र जटाधरं।
अक्षसूत्रं त्रिशूलं च बिभ्राणं च त्रिलोचनं।।२०७

इतिविचिन्त्यभावेन कृत्वाभिनन्दनंपुनः।
कुर्य्यात् नृत्यसमारम्भ तालमानरसाश्रयं।।२०८

तालश्रेष्ठसदानृत्ये शिवकृत्यं न् संशयः।
गीतवाद्यं च नृत्यं च सर्वे ताल समाश्रया।।२०९

संक्षेपेऽत्रप्रवक्षामितालज्ञान समुचितं।
सङ्गीतविषयाभेदे ताल विषदवर्ण्णना।।२१०

तालपरिचय

स्वरशास्त्रोक्ततालानि सप्तशतविधानिच।
प्रभवन्ति सदा नृत्ये गान्धर्वमत सेवितं।।२११

तालद्विविध सा प्रोक्ता मार्गलौकिकएवच।
दीर्घताल लघुताल विषमताल साधनं।।२१२

तालदीर्घह्रस्वयुक्तं छेदभेद विशेषतः।
मात्रायुक्तं समाबद्ध स च हि तालकेवलं।।२१३

प्रवक्षाम्यत्रभेदानि यत्किञ्चत् तालभेदयोः।
विषमाविपुलाठेका आडठेका तथैव च।। २१४

कल्याणगजकङ्कालि जयतालत्रिभङ्गकं।
द्वन्द्वप्रतापहंसाख्या मुकुन्द मलयस्तथा।।२१५

मल्लतालसिंहनाद नान्दीतालं च उत्सवा।
उद्दण्डउद्धट्ट तालं, राजराजचूड़ामणिं।।२१६

अष्टतालत्रिपुटंच षष्ठतालंच कुम्भवेत्।
एतानि विविध तालानि रम्यनृत्ये मनोरमा।।२१७

विषमस्ताल स ख्यातः विपुला एकतालवत् ।
अनुद्रुतद्रुतश्चैव विरामह्रस्वसाधनं।।२१८

एकतालिस्तथाढेका मात्राषड्भिः सुशोभितं।
त्रयस्तालस्त्रयोभेदाढेका आडढेकाउच्यते।।२१९

त्रिढेकायुक्तकल्याण गजह्रस्वचतुष्टयं।
द्वयंद्रुत द्वयोर्दीर्घढेकतालादिसन्निभं।।२२०

एवंकल्याणीसास्तालंनृत्यकाले प्रशंसितं।
द्वयंह्रस्वद्वयोदीर्घह्रस्वान्ते पूर्ववत् तथा।।२२१

ह्रस्वद्वयंपुनःद्वीपुर्धनःढेकादिदीर्घिका।
मात्राद्वयंह्रस्वयुक्त विराममेक शोभितं।।२२२

हंसतालइतिख्यातः लास्ये मुकुन्द एवच।
ढेकाह्रस्वचतुःद्रुतं दीर्घठेकाच मध्यमे।।२२३

ह्रस्वद्रुत पुनर्ह्रस्वह्रस्वद्रुत चतुष्टयं।
मलयदीर्घह्रस्वेच पुनःदीर्घतमेतथा।।२२४

मल्लचतुष्टयंह्रस्वो पुनःद्रुत द्विसंख्यकः।
सिंहनादह्रस्वयुक्तंपुनःह्रस्व त्रयान्वितं।।२२५

द्रुतद्वयंपुनःह्रस्वत्रययुक्तातिशोभना।
ढेकाह्रस्वद्रुतोद्रुताह्रस्वद्वयंच दीर्घिका।।२२६

पुनःढेकाह्रस्वद्रुताह्रस्वदीर्घंचदीर्घिका।
ह्रस्वप्लुतसमायुक्तं उत्सवानन्द वर्द्धिनी।।२२७

ढेकाद्रुतद्वयन्तोच ह्रस्वा उद्दण्डउच्यते।
दीर्घत्रयोउद्धटाच दीर्घाह्रस्वा द्विद्रुतये।।२२८

ढेकाद्रुतद्वयोह्रस्व द्रुतह्रस्वंच दीर्घिका।
पुनर्ढेकाद्रुताद्रुतह्रस्वत्रयद्रुतद्वयं।।२२९

ह्रस्वदीर्घसमायुक्तं राजचूडामणिंतथा।
अनुद्रुतंद्वयद्रुतं ह्रस्वंस्थान तथैवच।।२३०

अष्टताल इतिख्यातः सर्वनृत्ये प्रशंसितं।
द्वयद्रुतं ह्रस्वयुक्त त्रिपुटतालमुत्तम् ।।२३१

षष्ठाद्रुते विश्राम लघुनृत्ये विशेषतः।
पञ्चदुता अनुताद्रुता विरामदीर्घिका।।२३२

काललक्षण मात्राणि ह्रस्वदीर्घप्लुताक्रमे।
द्रुताऽनद्रुताश्चैव विश्राम सूक्ष्मभावना।।२३३

तालमात्रा बहुभेदाः देशकालान्तरे स्मृताः।
नृत्यतत्वा न्वयीग्रन्थे विशदाः किंप्रयोजनः।।२३४

एवंमात्राक्रमेतालभेद स्थान विचारणे।
करणीयं यथाशास्त्रे आचारे नियमे यथा।।२३५

देशाचारेवृतंताल चारी[1] लक्षण साधनं।
तालनास्तुततत्भूमिभूम्यानुस्तुत नर्त्तनम् ।।२३६

भूमी (क्षेत्र)
समंच विषमाभूमिभूमि पद्मत्रिकोणका।
स्वस्तिकंचक्रवर्त्तुलं चतुरस्रादि अष्टधा।।२३७

एबंभूमौषरिनृत्यं कर्त्तव्यानि विधानतः।
भूम्यानुसारिणीचारी भौम्रा[2] इत्यभिधीयते।।२३८

चारी
चारी सा द्विविधा प्रोक्ताभौमीगमनमाश्रिता।
भूमिसम्पृक्तभौमी सा शून्ये गगन नामिता।।२३९

---

१. M.S.S. 2 – छन्द
२. M.S.S. 2 – भङ्गी

रथचक्रापरीवृत्ता स्यन्दिता नुपूरपादिका।
मरालाकरिहस्ता च उरु वेणी च उन्मुखी।।२४०

कातरामृगत्रासाख्या अर्द्धमण्डलिकाक्षणा।
स्थितावत्ताइतिभेदाः चारी भौमीविधानतः।।२४१

मन्दाक्रान्ताअतिक्रान्ता प्लुतानगर मालिनी।
क्षीणाकुटिल चक्राब्ज तोषिणी मनहारिणी।।२४२

एवं बहुविधाचारी गगना नाम धारिणा।
विविधन्यासभेदेन बन्धनृत्ये विचक्षणा।।२४३

ग्रन्थान्तरेषुसूत्राणि यानिपूर्वे सुचिन्तितैः।
पूर्बग्रन्थानुसारेण येनदेशे प्रचारितं[१]।।२४४

युग्मनृत्य
शृणुअन्यतमंभेदाः उत्कले यः प्रतिष्ठितं।
युग्मप्रशंसितं नृत्तं पौराणिक स उच्यते।।२४५

विकट रूपभेदेन विविधंपार्वणोचिते।
विविधस्थानभेदेन विभिन्नविषयाणि च।।२४६

विकटद्विविधा प्रोक्तापौराशिक्षयिकातथा।
एकंपुराणमाश्रितं अपरं शुद्धलौकिकं।।२४७

कुत्राभिनयरूपेण श्रीकृष्णचरितावली।
नृत्यप्रदर्शनेकुत्र श्रीमद्रामायणं तथा।।२४८

---

१. M.S.S. 2 यथा देशे प्रचारित

हरिश्चन्द्रस्यकारुण्यं सागरसुत विक्रमम् ।
नानारूपाश्रयेनृत्यं लीलोत्सव स उच्यते।।२४९

मेषेचडकसंक्रान्त्यां चटका पाटवादयः।
विविधरूपयुक्तेन कुत्सितंरूप धारणं।।२५०

पुनःग्रामान्तरेकुत्र *वाउरिरजकादिभिः।
आचरेत्विविधंनृत्यं सुरम्येभिल्लनारीवत् ।।२५१

क्वचित्ग्राम्यान्तरेरम्ये घोटका, दानवाकृतिः।
रूपाश्रये भवेत्नृत्यं विकटं कौतुकावहः।।२५२

नृत्यंगोप्यतमं दिव्यं सर्वानन्द प्रदायकं।
नानाभेदसमायुक्तं मतानि विविधानि च।।२५३

तथापि क्षीणज्ञानेन यन्मया साधनंकृतं।
निवेदयामितत्सर्वं ज्ञानार्थिनांहितार्थये।।२५४

नृत्याभिनयभेदेनभिन्न भिन्नार्थ वर्त्तते।
तथापिसर्वभेदानां पूर्वाचार्य्यअनुश्रुतम् ।।२५५

अथ वस्तुप्रसङ्गेन वेशविन्यासमुत्तमं।
नटज्ञातव्यरूपेण प्रवक्षामि बिधानतः।।२५६

सर्वादौवीक्षणंलास्ये वेश कृत्य सुमञ्जुलं।
वेशदर्शनमात्रेण मनाकृष्टं च जायते।।२५७

वेशविन्यास (चित्रद्रष्टव्य)

विनावेशेनशोभन्ते मुद्रादृष्ट्यादिचालना।
शृणुवेशक्रमंरम्यं देव राजगणप्रियं।।२५८

---

* अन्त्यजजाति विशेषः

चूड़ान्यासत्रिभेदंच पुष्पचूड़ार्द्धवक्त्रकं।
कटिवेणीतथान्यासेत् पिच्छिलं सर्पदेहवत् ।।२५८

शिरोदेशेसुवर्ण्णेनकार्वरा[१] रागड़ादयः[२]।
चन्द्र[३]संमुखदेशेच पार्श्वदेशेति शोभने।।२६०

मथा[४]मणिंमध्यदेशेकेतकी[५] सुमनोहरा।
शिरंमण्डयते एवं सुवर्ण्णेन सुयत्नतः।।२६१

कर्ण्णद्वये कोरकंच[६] अथवा कापएवचत[७]।
त्रिगण्ठिकुण्डलंदिव्यं[८] वीरोवल्योग्र[९] नर्त्तने।।२६२

कर्ण्णोर्द्धेनागपाशंच[१०] बकुलकलिकोत्तमा[११]।
कण्ठाभरणरूपेण न्यासयेत् चापसोरिका[१२]।।२६३

आमलकी[१३]सर्षपीच[१४] चम्पकी[१५]कलिकाकृते।
मालान्यासयतेवक्षे काञ्चल्योर्द्धेविशेषतः।।२६४

काञ्चलादिव्यरङ्गेन नानारत्न विमण्डिता।
आवृतंवक्षदेशंच दृढेरम्ये सुयत्नतः।।२६५

मुख्यपदकंसंस्थाप्य वक्षमध्ये सुशोभने।
समान्तरालभावेन पदकंतिलकंतथा।।२६६

गोरोचनांसमालेप्यकपोले उर्द्धवपुण्ड्रवत् ।
भ्रुयोर्मध्ये च सिन्दूरंबिन्द्वाकारे विलिख्यते।।२६७

चिबुके मक्षिकाचिह्नं कृष्णवर्ण्णे विशेषतः।
नयने कज्ज्वलंस्निग्धं मीनपृछाकृते सदा।।२६८

वाहुदेशे तायितं[16]चकङ्कणं[17]ताड़कद्वयं[18]।
रसो[19]नवाङ्किता[20]माला निम्ने कवच[21] भूषयेत् ।।२६९

करन्निम्ने अतुलंच[22] कल्यारि[23] करकङ्कणं[24]।
कुङ्कुमेन समालेप्य युग्मंकरतलं सदा।।२७०

नाभिनिम्नप्रदेशेच कटिदेशे मनोरमे।
भूषयेत् भेकमुखादौ[25] कापमालोपरितथा।।२७१

किङ्किणि[26] निम्नभागेन मध्ये[27]झोवाविमण्डयेत् ।
नीवीबन्धनदृढ़ेन कटिदेशेतिशोभने।।२७२

पाददण्डे दृढारोप्य चापु[28]आणीमनोहरे।
मण्डयेत्पाददेशेन नूपुरं[29] पाहुडं[30] बलाः[31]।।२७३

चुपुल्याङ्गुष्ठयुक्तेन[32] अलक्ताद्रवरंजिता।
वेशविन्यास संयुक्ते नृत्य नेत्रप्रियंभवेत् ।।२७४

देशभेदे कथिता सो उड्रगान्धर्वउच्यते।
केवलाभिनयदृष्टे ग्रन्थाभिनय चन्द्रिका।।२७५

ममाराध्यगुरुदत्तंसम्यक्ज्ञानानुसारिणी।
*ग्रन्थाकारे प्रबोधार्थ गान्धर्वकुशलान्प्रति।।२७६

यदिशुद्धमशुद्धं वा द्विरुक्त विषयं क्वचित् ।
प्रसङ्गक्रमभेदेन ममदोषो न विद्यते।।२७७

उड्रदेश प्रशंसा

वैतरणीतटारभ्य यावत्महेन्द्र पर्वतं।
तावत् भूमि सुविख्यातं उड्रनामातिशोभना।।२७८

महोदध्यत्तरेपार्श्वे यत्रप्राची सरस्वती।
तत्र पुण्यतमंक्षेत्रं श्रीपीठे पुरुषोत्तमं।।२७९

नीलाद्रौपरिप्रासादं रम्यंगगन चूम्बिनी।
गङ्गकीर्त्ति इतिख्यातःयावत् भुवनमण्डले।।२८०
सुविख्यातोक्त वंशेऽनङ्गभीमाङ्कितपदे।

ग्रन्थरचनाकाल

खेमण्डिराजमार्त्तण्ड सर्वविद्या विभूषिता।।२८१

श्रीमान्नारायणदेवो भूपालो धरणीपति।
गजपतिपदाक्रान्त राजा सर्वजन प्रियं।।२८२

कविताकुञ्जकोकिलंशिखिवत् नर्त्तनप्रियं।
शुकवत् सर्वदावाक्ये कृष्ण कृष्णेति केवलं।।२८३
एवंसौम्यतमंरूपं भुजबलं पराक्रमं।

---

* M.S.S. 2 – भावखण्डप्रवक्ष्यामि।

राजत्वे वसुवर्षीये पुस्तकमिदं सम्पूर्णं*।। २८४
इतिश्री महेश्वर महापात्रेण विरचित
अभिनय चन्द्रिकायां नृत्यखण्ड
नामा प्रथम स्तवकः।।

अथभावभण्डम्

नृत्यंहि सर्बदाश्रेष्ठःराजकार्य्येमहोत्सबे।
विनोदेब्यसनेचैव नृत्यमानन्द दायक।।१

नृत्यवाद्य विनोदेन चतुर्भवति निश्चलं।
तथापितद्विनाभावं केवलं नर्त्तनं ध्रुवं।।२

भावयुक्ते तथा मुक्ते मनः प्रवृत्तिनिर्वृति।
तदानुसारिणीभावाः विकारा मानसात्मिका।।३

भावहाव तथाहेला अङ्गजानटी मोदिता।
नागरीशोभिताःसर्वे भावलंकार मुख्यतः।।४

निर्विकारात्मिके चित्ते भावः प्रथम विक्रिया।
स्पन्दनाकृति संभाव मानसाङ्ग विवर्द्धिनी।।५

विनाभावे सदाक्लीवं मनःमूढ़ो विशेषतः।
भावयुक्ते मनोयाति दृश्यभेदेच ईक्षणे।।६

नायिका नायकभेदे दृश्यादृश्यागमे तथा।
प्रकाशयन्तिअङ्गेन भङ्गीयुक्ते मनोरमे।।७

तत्श्रेष्ठभाव नाम्ना सा नृत्याङ्ग मुख्यद्योतना।
विनाभावे न सिद्ध्यन्ति नृत्याभिनय मुख्यतः।।८

---

* सम्पूर्णमिदंपुस्तकं

इतिमतिगताक्षिप्रा भावनृत्ये विधानतः।
उड्रदेशेसदाभावरंजितं नृत्यमण्डलं।।९

वटुनृत्योत्तमे लास्ये केवलंभाव मुख्यतः।
छन्दबन्धे तथा नृत्ते भावादि किं प्रयोजनं।।१०

देहेभावगतिरम्ये इङ्गितादि विलक्षणे।
रति विरति संयुक्ते नृत्याभिनयपेक्षणी।।११

सत्वरजोतमो वृत्ते विंकारः भावमुच्यते।
रसज्ञानात्क्रमेभावःनृत्ये आनन्द वर्द्धकः।।१२

रसभेदानि
त्रिभेदगुणयुक्तेन सात्विके सात्विकं तथा।
स्थायीरजोगुणापेक्षी तामसे व्यभिचारिणी।।१३

गुणत्रय विभागेन गुणादिभावलक्षणः।
क्रोधउत्साह हास्यं च शोकभावतथैव च।।१४

भयंचरतिरम्यंच विस्मयंभाव लक्षणं।
युगुप्सा इति अष्टानां स्थायीभावाः विनोदनं।।१५

शङ्कासूया दैन्यचिन्तामोहश्चेति धृतिर्गुणाः।
व्रीड़ाहर्षस्तथागर्वः विषादं स्वप्नचिन्तनं।।१६

निरोधमदनिर्वेदभ्रममालस्य उग्रता।
अपस्मारममर्षादि व्याधिमृत्यूभयं तथा।।१७

वक्त्रे जड़तामालस्यंभ्रमग्लानितथैवच।
निर्वेदइति भावानि त्रिंशश्च व्यभिचारिका।।१८

सात्विकभाव लक्षणम्

श्रृणु अष्टविधाः भेदाः सात्विकभाव लक्षणं।
स्वेदरोमाञ्च स्तम्भोऽथ स्वरभङ्गादिवेपथुः।।१९

वैवर्ण्यमश्रुपातंच प्रलयादि प्रदर्शनं।
अभिव्यक्तिविमुक्तिं च रतिर्मानस लक्षणः।।२०

त्रिविधाभावमुख्याच रतिज्ञान प्रदर्शने।
इति ख्याता महाभावाः कर्त्तव्यानृत्यवेदिना।।२१

अलंकारमयंभावाः लीलाविलासतत्परा।
भावानुपेक्षितंहाव हेलाअङ्गादि दिप्तिता।।२२

शोभाकान्तिप्रगल्भं च औदार्य्यंधैर्य्यएवच।
माधुर्य्यरति लीला च विलासविभ्रमं तथा।।२३

किलकिञ्चित् विच्छित्ति विव्वोक ललितंततः।
मोट्टायितंकुट्टमितं विकृतादि विमूर्च्छना।।२४

काव्यशास्त्रानुसारेण रतिनृत्ये समाचरेत् ।
उड्रदेशे सदाश्रेष्ठं नृत्याभिनय प्रक्रिया।।२५

साभिनयं सदा काव्यापेक्षणी जनमोहिनी।
यद्यपिकाव्यं हि मुख्यं गानकाल विचारणा।।३६

विनालंकार युक्तेन निष्फलंनीरवंसदा।

वटुनृत्य

वटुनृत्ये नहि वाद्यं नहिकाव्य विनोदनं।।२७

केवलंतानयुक्तेन स्वेरतालादि मुख्यतः।
तथापिलोचनेओष्ठेकट्यां पादद्वयेतथा।।२८

विनालंकारयुक्तेन नृत्यादि विफलं भवेत् ।
शृणुत्वं लक्षणं दिव्यं अलंकारादयः पुनः।।२९

लक्षणादिसमायुक्तेः सर्वकारण संग्रहः।
ग्रीवानेत्रेतथाकट्यांभ्रूभङ्गयादिप्रकाशनं।।३०

भावानुपेक्षितंसर्वं अंगादिहाव कथ्यते।
केलिपातंश्चचशृङ्गारे मैथुने कामसूचके।।३१

हेलाइतिरतिभावं नृत्यार्थी मोददायकंः।
बेशविन्यासयुक्तेन जूड़ादिकाञ्चलादयः।।३२

त्रिकच्छादि समायुक्तेः शोभा अंगविभूषणं।
शोभायुक्ते तथाकान्ति सौष्ठबं लक्षणानिच[१]।।३३

न पृथुलं न चक्षीणं कान्तिमध्यमसुन्दरं।
मध्यांगकान्ति युक्तेन देशपात्र विचारणा।।३४

प्रसंगक्रमभेदेन कान्तिदीप्तिकरंभ्रुबं।
प्रयोगे वा प्रकारे वा पात्रा पात्रविचारणा[२]।।३५

बुद्धियुक्तेः तथारंगे क्रीडनेच प्रगल्भता।
सर्वभावान्वये अंग हृदये विनयं महत् ।।३६

नम्रभावानुयुक्तेःन नटी औदार्य्य प्राप्यते।
तालमानानुसारेण पादादि पातन क्रिया।।३७

---

१. M.S.S. 2 –न्वित

२. M.S.S. 2 – विचारयेत्

विधियुक्ते तु कर्त्तव्यं धैर्य्ययुक्ते सदानटी।
इतिधैर्य्यसदाश्रेष्ठ नृत्यालंकारभूषणं।।३८

भूणणादिसहरम्यं लीलाविषयभूषणं[१]।
सर्वलक्षणसंयुक्तं सर्वागंभूषणानिच।।३९

वेशानुरूपवं अंगरतिमाधुर्य्य उच्यते।
गतिपादादिभिः भंगी मुखनेत्र समन्विते।।४०

चालनादि सुरम्येन विलासंरास मण्डना।
विभ्रमंवटुनृत्येन विरहभावपेक्षणी।।४१

हताशाकामक्रान्ता या नटीविभ्रम मानसा।
इतस्तुते[२] तथामाला वस्त्रादिभूषणादयः।।४२

अव्यवस्थित भूषाच विभ्रमंरतिमुत्तमं।
इर्ष्यापरिविमर्षेच दर्शने दर्शनोत्सुकः।।४३

आकांक्षित इतिभावः नामितं किलकिञ्चितं।
विच्छित्तिव्यक्तभावेन विब्बोकाव्यक्त चिन्तने।।४४

गर्वभावे सदाश्रेष्ठं विब्बोकइति लक्षणं।
शान्तभावानुयुक्तेन रम्ये लघुमनोहरा।।४५

भ्रुवादिचालने मिष्टं ललितं मधुर प्रियं।
प्रियालिङ्गन युक्तेन हृष्टं[३] प्रफुल्ल मानसं।।४६

---

१. M.S.S. 2 – पेक्षणम्
२. M.S.S. 2 – विचारयन्
३. M.S.S. 2 – उत्फुल

उत्फुल्ल

मात्रभङ्गीसमायुक्ते विपरीताङ्गदर्शनम् ।
हृदयेललितंभावः प्रकाशेक्रोध लक्षणम् ।।४७

एवंव्यतिक्रमरीत्या कुट्टमितं मनोरमा।
नागरप्रीति सन्देशे नागरः पत्रपाठने।।४८

उत्पद्यते यः प्रीतिभावं समोट्टायित कथ्यते।
विरुद्धभाषणेघोरे वट्टुनृत्ये विशेषतः।।४९

उग्रादिभाव सम्पन्ने विकृतंरतिमुत्तमं।
एवंसर्वविधंनृत्ये प्रपञ्चेऽभिनये तथा।।५०

अलंकारान्वितरीत्या नृत्येषुरम्य सर्वदा।
लघुनृत्ये तथालास्ये रम्यंरम्यतर भवत् ।।५१

विनारीत्या सुदृष्ट्यादि सकलोनिष्फलो भवेत् ।

नृत्तलक्षण

विनाभिनयभावाद्या विहीनं नृत्त कथ्यते।।५२

रसभावान्वेयेनृत्यं रतिनृत्यमितीर्यते।
लघुर्वाताण्डवेचैव रतिमित्यभिधीयते।।५३

रतियुक्तेन लास्याङ्ग उग्रता प्राप्यतेध्रुवं।
कौशिकीवृत्ति संपन्ना सदाललित मानसा।।५४

लघुनृत्योत्तमे नारीश्रेष्ठा प्रहृष्टचेतसा।
आरभटी वृत्तियोगेन उग्रं पौरुषलक्षणम् ।।५५

ताण्डव लक्षण

द्विविधंताण्डवख्यातं पेवलि बहुरूपका।
पेवलिबन्ध नृत्याङ्ग विषमा अङ्गचालना।।५६

योजनाकरपादाभ्यांद्रुता विक्षेपकारणात् ।
लास्याङ्गप्रान्तभागेन अन्तताल समागमे।।५७

यौवनेघ्रुवयुत्तेःन नृत्यन्ति नृत्यवेदिनः।
बुहरूपाख्यनृत्येन हावभावादि लक्षणम् ।।५८

छेदनादिकटिपादाः करन्यास प्रयोजनं।
पेवलिउग्रनृत्याङ्गं लीलाग्रे प्रान्तदर्शने।।५९

उड्डदेशे वीणाकार लीलासूत्र धरंयथा।
दण्डनृत्ये तथा पुंसः दण्ड कार[१] विचक्षणः।।६०

सव्यांशे तालधारीच मृदङ्ग वामदक्षिणे।
मृदङ्गमुत्तरेतत्रकांस्यताल द्वयंतथा।।६१

तयोर्मध्येनटीरम्ये पेलविनृत्यचारिणी।
पेलवि वा उद्धटीवा कुतपं मुख्य सर्वदा।।६२

लास्येनकुतपः श्रेष्ठः वट्टनृत्येच मण्डलं।
रङ्गप्रवेशमात्रेण कर्त्तव्यं रङ्गमण्डले।।६३

प्रस्तावनाक्रमे नृत्य लीलाविषय वर्ण्णना।
उत्सवेव्यसने चैव युद्धकार्य्य महोत्सवे।।६४

---

१. M.S.S. 2 बीणाकार

पेलविबन्धरूपासा सर्वदाजनमोहनं।
वहुरूपा तथा यशुद्ध उग्रं महेश्वरप्रियं।।६५

साभिनयसमायुक्तेः पूर्वरङ्गमनुश्रुते।
मुखताल समान्याय वाद्यताल समाश्रिते।।६६

शिववेशधरः पुंसः अथवा नागरि स्वयं।
कथितंताण्डवंमेढ़ नानारूपधरात्मकः।।६७

अष्टं वा दूशभुजं वा ललाटंतिलकाकृते।
बहुरूपात्मिका नृत्ये बहुधाशङ्कराकृति।।६८

सप्तताण्डव नामानि

आनन्द कालिकागौरी सन्ध्या पार्वती एवच।
त्रिपुराताण्डवंउग्रे संहार एव सप्तधा।।६९

एवंनाना,वृकतेरङ्गे उग्रनृत्य मनोहरं।
पूर्वरङ्गानुसारेण करे हार समन्वित।।७०

वहुधानाम कल्पन्ते नृत्यार्थी नृत्यभेदतः।
करन्यास समायुक्त पदन्यास समाश्रिते।।७१

बहुधाकरणन्यासः कर्त्तव्यं उग्रनर्त्तने।
एकहस्ते सममुद्रा समक्षेत्राङ्ग दर्शने।।७२

मातृकादि वरण

मातृकाइति सख्यातः पक्षेन उपमातृका।
वेदहस्तसमायुक्ते करक्षेत्र कलापक।।७३

वन्धवंयुग्महस्तेन वाणे संघात एवच।
महाघात तथा षष्ठे समुद्रे मण्डलाङ्कितं।।७४

नृत्य की विभिन्न मुद्राएँ















न्दी साहित्य सम्मेलन प्रयाग (इलाहाबाद) से सम्बद्ध)
कार्यालय : बी-2/215, पश्चिम विहार, नई दिल्ली - 63





शिव का तांडव नृत्य

पर्य्यायानुक्रमे न्यासः कर मुद्रा सुशोभनं।
बृश्चिककरमुद्रांच भूजङ्गाश्रित साम्भव।।७५

ताण्डव करणानि

अर्द्धसाम्भवसंयुक्ते तल संपूट चारिणी।
लुलितावलिताचैव गुध्रावली तथैवच।।७६

करिहस्तास्वस्तिकंच अर्द्धस्वस्तिक ज्वालिनी।
वरदंआश्रिताचैव चतुरः सौम्यदायकः।।७७

वुंञ्जरवक्त्ररूपाच कर्षणाचार्द्धकर्मठा।
करछत्र महामुद्रा नूपुराज्ञानकर्षिणी।।७८

एकविंशति मुद्राणि वटुनृत्ये शुभप्रदं।
उद्दण्डे समदोर्दण्डे छन्दनेभेदने तथा।।७९

नर्त्तने व्यसनेचैव ताण्डवं शुद्धनर्त्तनं।
मर्द्दलतालयुक्तेन टंकारतन्त्रीशोभितं।।८०

प्रेक्षातालंतथासौम्य अनुतालातिराघवकं।
कांस्यतालादि युक्तेन पुंनृत्यं जनरञ्जकं।।८१

वुश्चिक

श्रुणुत्वं करन्यासानि नृत्यार्थीज्ञानवैभवं।
पादाभ्यां कुञ्चितातत्र अथवा अर्द्धकुम्भवत् ।।८२

शिरोर्द्धेपल्लवाभ्यांच पल्लीपृष्ठोर्द्धदर्शिते।
समाकारेभूजाःसर्बे अंगुलिधरणींप्रति।।८३

शिरोर्द्धमण्डलेमुद्रा वृश्चिकंतत् प्रकीर्त्तितं।
विक्षिप्तपादयुक्तेन अर्द्धस्वस्तिक मासने।।८४

ध्यानमुद्रासममेकं संमुखे दण्डदर्शनं।
कटिंजानुश्रुतैअंगंत्रिभंगभगी भंगीमा।।८५

अपरंकर संस्थाप्य दण्डे यथावलम्बनं।
मणिबन्धोपरिबन्धं भूजंगाश्रित लक्षणं।।८६

बक्षपार्श्वोत्तमक्षेत्र आरभेत नट पुंगव।
करद्वय पार्श्वक्षेत्रे लम्वाकारेण संमुखे।।८७

साम्भव

समाकारेद्वयो:पल्लि पूर्ण्ण साम्भवमुच्यते।
भूजैकलुलिताकारे सम्भवाकृतिमाकृतिं।।८८

अपराध्यानभावे वा योगंवा आश्रितोपमः
वामांघ्रिकुञ्चितंकुत्र दक्षिणंकुञ्चिताधिके।।८९

तलसंपुटिताहस्तौ उर्द्ध्वेवा करचुम्बिते।
एककरं सदा सव्ये अपसव्येतथैव च।।९०

अर्द्धसाम्भव

अर्द्धसाम्भवयोगेन तालानुस्रुतमाचरेत् ।
शिरोर्द्धे उर्द्ध्वगा पल्लि पार्श्वगे अपरातथा।।९१

लुलिताकरयुक्तेन ताण्डवे च मनोहरं।
कटिदेशोपरिन्यस्तं वामे वा दक्षिणेन च।।९२

अपरापार्श्वक्षेत्रेण अभयादि समाश्रिते।
हस्तमेकंपार्श्वक्षेत्रे लम्बाकारेणनिम्नगा।।९३

अपराशिरपार्श्वेच पताककरयोगतः।
उर्द्ध्वकरसमायुक्ते सूचं वा नागमस्तकान् ।।९४

गुध्रावली

संदर्शयेत् सुयत्नेन कर्त्तव्यंनृत्यवेदिनः।
गुध्रावली इतिख्यातः ताण्डवे सौम्यदर्शनः।।९५

श्रृणुत्वंसविधिः मार्गं वुंजरवक्त्रलक्षणं।
बृश्चिककरभावेन करमेक प्रदर्शनं।।९६

अन्याचपार्श्वदेशे च लुलिता साम्भवोपमा।
हस्तागुंलिसंमुखेच चुम्बिते सूचीमुखवत् ।।९७

कुञ्जरवक्त्रा

करिहस्तं तु कर्त्तव्यं उग्रे नागरिनर्त्तने।
रेचितंस्वस्तिकं श्रेष्ठाकराम्यां कटि सन्निधौ।।९८

स्वस्तिक

अर्द्धकुम्भाकृते पाद अथवाकुञ्चिताकृते।
कराभ्यांवृश्चिकोन्याये कट्योर्द्धमण्डले तथा।।९९

अर्द्धस्वस्तिक

शुद्धस्वस्तिकएतेषां नारीनृत्ये विशेषतः।
हस्तमेको यथापूर्ब अपरोवृश्चिकोपमः।।१००

अर्द्धस्वस्तिकसौ मुख्यः वटुनृत्ये मनोहरः।
व्याग्रपल्लिसमपल्लि विक्षिप्तचतुरांगुलि।।१०१

सम्यकन्यूनतरे वक्रं अंगुलि पल्लवंप्रति।
ज्वालिनीकरमुद्रासा उग्रनृत्येप्रयोजनं।।१०२

अभयाकरयुक्तेन शिरोर्द्धे वरदंभवेत् ।
आश्रिता कटियुक्तेन अंगुष्ठंकटिपृष्ठगा।।१०३

३५९५१
०१/०३/२०१८

संमुखेऽन्यानिसर्वाणि किञ्चिन्न्यूनतलावधि।
केवलंएकपार्श्वंच त्रिभंग्यासन स्वस्तिके।।१०४

नकुर्य्यादुभयोपार्श्वे लास्याग्रे न कदाचन।
छत्राकारे करमेकं अपराकटि पार्श्वगे।।१०५

ध्यानमुद्रा समायुक्ते उत्तानपद लक्षणं।
छत्रहस्तयदापार्श्वे तत्पार्श्वेकुञ्चितापद।।१०६

चतुरं

दृष्टिध्यानकरान्यस्ताचतुरं सा शुभप्रदा।
एकहस्तसमायुक्ते गजशुण्डाकृतिं महत् ।।१०७

क्षिप्तपादादियुक्तेन नर्त्तने सौम्यदर्शनं।
छत्राकारेकरमेकंपृष्ठे वा तल पल्लवे।।१०८

दण्डछत्र

दण्डछत्रसौम्यछत्रंनामतः द्विविधोमतः।
भूजदण्डाकृते उर्द्धवेकेवलं पल्लिछत्रवत् ।।१०९

दण्डछत्र इतिख्यातः ललाटतिलकोत्तमे।
वक्रेणभूजशिरोर्द्धेतलोर्द्धंदर्शितं परां।।११०

सौम्यछत्र

सौम्यछत्र इतिख्यातः उग्रनृत्ये मनोरमं।
कुटिलपादयोगेन दण्डवत् करपल्लवाः।।१११

पक्षाकारे उभयो पार्श्व लम्बाकारेसमन्ततः।
अर्द्धचन्द्राकृते पल्लि निम्नगा अंगुलिं सदा।।११२

३५९५१
०१/०३/२०१८

नूपुरंताण्डवे श्रेष्ठंलास्येक्वचित् सुखावहः।
नृत्यखण्डंयथाकारे तादृशंज्ञानपल्लवं।।११३

उग्रेच सर्वदाश्रेष्ठः उग्रमुद्राइतीर्यते।
अधुनात्र प्रवक्षामि वटुनृत्यांगभावना।।११४

रतियुक्ते मनोग्राह्यं मुद्राभङ्गी सदाध्रुवं।

महाशाभाव

बुश्चिकोव्यापृताभावेच्छेदने छादने तथा।।११५

स्थितिभावात्मकन्यासः गर्भस्थ इतिज्ञापकः।
स्थितिमुख्यइतिभावःताण्डवे सौम्यदर्शनं।।११६

सर्वाच्छादनरूपेण कर्त्तव्यंवृश्चिकोत्तमा।
भुजङ्गाश्रित्यमाश्रित्य वध बन्धन नैत्तिका।।११७

स्थितियोगात् प्रसङ्गेन कान्ति सौष्ठवईक्षणे।
अनुरक्ति सानुबन्धे निर्बन्धे अभिचेतने।।११८

भुजङ्गाश्रित स ख्यातः पार्श्वक्षेत्रे विधानतः।
साम्भवालम्बनेश्रेष्ठः व्याप्तिभावान्वये सदा।।११९

परिव्याप्तेसदापार्श्वे साम्भवंव्याप्त लक्षणा।
अर्द्धसाम्भव स ख्यातः द्विविधोन्यास मार्जितः।।१२०

एकोसव्यापसव्येन अपसव्यंच दक्षिणे।
सहमुद्राकृते अन्याशिरोर्द्धे न्यासितंध्रुवं।।१२१

एवंन्यासक्रमयुक्ते सर्वदा मुक्तलक्षणं।
चलत्क्रियोद्भवभावे गतिर्गर्वित मानसे।।१२२

उत्ताननृत्यभावेन आचरेत्चार्द्धसाम्भवं।
तलसंपुटितो सव्वे उन्मादलास्य नर्त्तने।।१२३

तालभङ्गक्रमे न्यासेत् भङ्गीमानन्द दायकः।
आच्छादयति सा माया यः शिवस्य कलात्मकः।।

विस्तारंभवति यत्र तत्र तत् सृजनं महत् ।
परिवृतार्थशिरोर्द्धे सृजनार्थेच साम्भव।।१२५

सदासृष्टिप्रदादर्शे कर्त्तव्यंलुलितं महत् ।
करक्षेपण युक्तेन दृष्टिभङ्गी समाचरेत् ।।१२६

नटीप्रदर्शयेत् भावंकरयोगे विशेषतः।
काव्यशास्त्र विनोदेन शब्दादिरस चिन्तनं।।१२७

अष्टादश दृष्टि

नेत्रभङ्गी तथा भावे बहुधा नट लक्षणे।
भोगतीर्यक् उर्द्ध्वदृष्ट अङ्गार्द्धभूमि संश्रवा।।१२८

स्थिरा अवनताचैव कुञ्चिता घूर्प्पिता तथा।
मुद्रिताशिवनेत्रंच चालितास्तम्भिता जया।।१२९

एता अष्टादशा नेत्र नृत्ये भावप्रदायिनी।
स्थायीभावेतथादिव्ये व्यभिचारे विचक्षणा।।१३०

ननेत्रभावप्रत्यक्षे सात्विक भाव दर्शने।
देवालये उत्सवे च पट्टुआरे विशेषतः।।१३१

सेवाकाले न कर्त्तव्यं विविधं दृष्टिभावना।
रङ्गालयेगणेसंधे विचित्र नृपमण्डले।।१३२

नाट्यारम्भे तथामध्ये नृत्य दृष्टिंसदाचरेत् ।
श्रृणुत्वंदृष्टिभेदेन नेत्र न्यास सुनिर्मलं।।१३३

नेत्रन्यासविना नृत्यं नृत्तं भवति निष्फल।
स्थिरालपनयुक्तेन केवलं पितुलाद्वयं।।१३४

भोग

पादभूमिसमाबद्धे भोगदृष्टि मनोहरं।
आह्वानापेक्षस्थैर्य्येच पराङ्मुख विचक्षणे।।१३५

भोजनग्रहणे सौम्यभागदृष्टिः सदाचरेत् ।
पार्श्वेतिर्यक्मुखं पार्श्वेनेत्रकोणेडोलादयः।।१३६

तिर्यक

दृष्टिसंपूर्ण्ण पार्श्वे च तिर्यक्दृष्टिः स कथ्यते।
सनधानेविह्वलार्थेच मुग्धे च प्रेमभाषणे।।१३७

उन्मादभाव युक्तेन तिर्यक्दृष्टि नटीचरेत् ।
उर्द्ध
संमुखे स्थिरमुखेन उर्द्धवदृष्टिं नभंप्रति।।१३८

नेत्रपट्टस्वयंशान्तःचञ्चलं पितुलाद्वयं।
प्रशान्तव्याप्तभावेन शून्यभाव प्रदर्शने।।१३९

सूररङ्गालयार्थेच नभे वारिवहागमे।
किञ्चित् वक्त्रान्वये मुण्डपार्श्वेस्वगात्र दर्शने।।१४०

अर्द्धाङ्ग

देहपार्श्वेवलोके च अर्द्धाङ्गदृष्टिमाचतरेत् ।
प्रेमावशे विक्रितेच नृत्यारम्भे च क्रीडने।।१४१

श्रवणानुरते मुग्धभावे अर्द्धाङ्गलोचनं।
वक्राङ्गयोगसंयोगे कुटिलपादमाश्रिते।।१४२

तलदृष्टिभूमीसंश्रव

पार्श्वेसंमुखभागेन दृष्टिंतलमुखान्वये।
गुल्फोमुखीमुखस्तत्र दृष्टिंभूमौपरिस्थिता।।१४३

एवं, नेत्रोत्तमभाव भूमिसंश्रव लक्षणः।
भग्नभावे संग्रहे च बिषमे तालभञ्जने।।१४४

अनुनत्त इतिवाक्ये शिशुलालन तत्परे।
भूमिसंश्रव युक्तेन नतदृष्टिर्मनोरमा।।१४५

नृत्यप्रान्ते तथाबन्धे कर्त्तव्य नटीमाचरेत् ।
एकपार्श्वाच्च निगृह्य अपरपार्श्व दर्शने।।१४६

इतस्ततःक्षणं दृष्टिः पार्श्वे अपाङ्गचालनं।
विद्युतप्रकाश दृश्येन अपत्यस्नेह माधुरी।
चक्षुणासाक्षणदृष्टि क्षत्रमात्र प्रदर्शने।।१४७

चपला

निर्देशरोधभावेन चपलानेत्र मुख्यतः।
चपलाचपले चेति नृत्यमानन्द दायिका।।१४८

विष्फारिता

विष्फारिता सदा उग्रं उग्रं विकट दर्शने।
अद्भूते विस्मिते चैवष्फारिता विरहोत्तमा।।१४९

स्थिरा व्यग्रा

स्थिरानेत्रद्वयेतत्र पितुलाचक्रवत् तथा।
पितुलाचालनेव्यग्रे व्यग्रभग्रवेनुत्तमः।।१५०

आलोडने न कर्त्तव्यं अतिकोपान्वयेतथा।
घर्षणे वा मर्द्दने वा अभिव्यक्ते मनोरमे।।१५१

अभिताड़न युक्तेऽन तिरस्कार प्रदर्शने।
व्यग्रा व्यग्रतरा दृष्टिः सदाव्यग्र प्रदायिनी।।१५२

कुञ्चितादक्षिणानेत्र वामाविष्फारितातथा।
पार्श्वदृष्टि सदानृत्ये भय मानस द्योतका।।१५३

विपद्ग्रस्ता नृपत्रस्ता क्षुब्धा उद्विग्नमानसा।
आतुरा
एतेसर्वे भावयुक्ते आतुरा लोचनाध्रुवं।।१५४

अर्द्धस्फारिता

पार्श्वक्षेत्रे भ्रुवोयुक्ते भूमिदृष्टि विधानतः।
अर्द्धोन्मिलित नेत्राभ्यां कथिताचार्द्धस्फारिता।।
पार्श्वयुक्तेद्वयोःपार्श्वे नृत्यप्रारम्भकालीने।
नेत्रइति सुविख्यातः आकर्षभाव सन्निभा।।१५६

प्रेमाकाङ्क्षारतिक्रान्ता आकर्षा कर्षणप्रिया।
संमोहिता इतिभावे नेत्रं कर्त्तव्य नर्त्तकी।।१५७

विस्फारिताभ्रुवोर्मध्ये स्थिरा पुत्तलिकाद्वयं।
स्थिरा
सानेत्र कथिता स्थिरा स्तम्भीभूत क्रियावली।।१५८

स्थिरागम्भीर चकिता सदा आश्चर्य भाविनी।
अद्भूतश्रवणे स्थिरा क्रोधिते रतिभङ्गने।।१५९

मुखसञ्चालने भव्ये संमुखे च पुनः पुनः।
संमुखेनतभावेन पुनः उत्तोलिते तथा।।१६०

तत्सहालोचनाभावे नभोमुक्त क्षणं क्षणं।
मध्येनर्त्तन कर्त्तव्यं अवनता लोचनं सुधी।।१६१

क्रीडामयी नटी क्रीडा मुख्य नृत्यमहोत्सवे।
प्रतितालान्वये हस्त कर विक्षेप सुन्दरं।।१६२

मूर्च्छनातालयुक्तेन दर्भयुक्त? क्रीडास्थले।
मुख्याऽवनतादृष्टि[१] (भ्रूयुगं कुञ्चिताचार्द्धमुद्रिता)
उभयोर्नयनेप्रान्ते कुञ्चितालोचनद्वयं।।१६४

पार्श्वक्षेत्रगतादृष्टि भ्रूयुगं चार्द्धमुद्रिता।
मधुरभर्त्सनाक्रोध प्रेमविरह घातिनी।।१६५

निर्देशभाब सश्रेष्ठः हृदयोद्वेगमानसे।
स्फारितां भ्रूयुगोर्मध्ये घूर्णिता पुत्तलिद्वयम्।।१६६

बन्धेनृत्ये सदारम्यं दीपनृत्ये विशेषतः।
सन्धाने लाडने नृत्याक्षिप्तताल प्रदर्शने।।१६७

स्फारितादृष्टि कर्त्तव्या दर्शकानन्द वर्द्धकं।
मुद्रिता
मुद्रिताध्यानरूपा सा सुप्तभाव प्रकाशिनी।।१६८

---

१. M.S.S. 2 लघतालमनोरमा

काव्यानुगत वाक्येन कर्त्तव्यंनाट्यवेदिनः।
अर्द्धोन्मिलित भूरुभ्यां पितुला उर्द्ध्वगामिनी।।१६९

अर्द्धदृश्याडोलास्तत्र शिवनेत्रा मनोहरा।

शिवनेत्रा

निमग्ना भावयुक्तेन तल्लीना ईश्वरं प्रति।।१७०

योगी योगरता भावे दृष्टि नृत्ये विधियता।
स्वाभाविक मुखे नेत्रे स्वभावा नयनद्वयं।।१७१

नृत्यमुद्रासहभिन्न क्षेत्रे चालनपेक्षिणी।
चालितादृष्टिः सा सिद्धा केवलंकरचालने।।१७२

हस्तकादि समायुक्ते भिन्नाभिन्नः स जायते।
स्वाभाविक नेत्रयुक्ते केवलंश्रवणेरतं।।१७३

एवंभावान्वयि दृष्टि स्तम्भिताकथिता सदा।
अष्टादशदृष्टिभेदे भावंलयानुसारिणी।।१७४

नेत्रापांगइति श्रेष्ठं नृत्यज्ञान विभूषणं।
विनादृष्टि मुखाल्लास भावादि निष्फलंध्रुबं।।१७५

दृष्टिर्लपनवक्षे, च कटिपादकरद्वये।

नृत्यषड़ाङ्ग

भावंसन्दर्शयेत् नित्यं षडांग अंगभावना।।१७६
विनाषडंग ज्ञानेन नृत्यंदेशि स जायते।
श्रृंगारवीरकरुणोहास्यरौद्रोभयानकः।।१७७
विभत्स अद्भूतोशान्तः सर्वेषड़ांगपेक्षिणः।

नेत्रमुख्यतरं नृत्ये मुखभावप्रदायकः।।१७८
हास्यक्षुब्धंच व्यादान रुद्धं विकटमेवच।
लुलितंक्षिप्त लपनं स्फारितंनम्रमस्तकम् ।।१७९

नवमुखभेद

भावरसादिसंयुक्ते नवधामुखमाचरेत् ।
लास्यहास्यमयं श्रेष्ठं अधरे पार्श्वदर्शने।।१८०

अधरप्रान्तभागेन कुञ्चिता अधर द्वयं।
क्षुब्धोलुब्धक प्रेमांग शृंगार भावधारिणी।।१८१

ओष्ठद्वयं समोभागेऽवनता संमुखादपि।
प्रसारित ओष्ठद्वयोः व्यादानं च भयानकं।।१८२

रसनाकुञ्चित गर्भे व्यादानंमुखलक्षणं।
ओष्ठद्वय समाबन्धे वीरभाव प्रदर्शने।।१८३

रुद्धमुखंसदाउग्र नर्त्तनेताण्डवे सदा।
विकटमुखकूटेन पृथक् वा मिलितेनवा।।१८४

दंशनदर्शनघोर रौद्रभावसमान्विते।
नतोष्ठद्वययुक्तेन लुलितंअधरंप्रति।।१८५

लुलित करुणनृत्ये तापसन्तापज्ञापिनी।
क्षिप्तविभिन्नदशनां स्फारिता कुञ्चितातथा।।१८६

भिन्नक्षेत्र गताओष्ठंविभत्सरसमाश्रया।
स्फारितेओष्ठदशनं इतस्तंतांगचालनं।।१८७

नानाभंगीसमाश्रित्य अद्भूतोरस स मद्भूतं।

नवधामुख

नम्रप्रशान्त बदन निर्विकल्पो समंमुखः।।१८८

शान्त रसज्ञ नम्राख्य मुख लक्षणमुत्तमं।
नवधामुखसंख्यात नृत्यार्थीरसज्ञपने।।१८९

नेत्रमुखद्वयोर्युत्तेः भावंप्रवृष्टजायते।

वक्षभेद

मुखसमान्विते वक्षं ख्याता त्रिविध कामतः।।१९०

भद्रंसव्योऽपसव्येन नृत्यार्थी वक्षभूषणं।
भद्रसंमुखयोगेन सव्यासव्यानुगा तथा।।१९१

अपसव्यानुगावामे चालितो भयपार्श्वयोः।
कटिलक्षण चत्वारः स्थापनिक्रमभेदिनः।।१९२

कटिचत्वारि

वामातुं गदक्षतुंग उत्तुंग तलतुंगिका।।
कटिस्थाने कटिन्यासः तेषां वक्षामि लक्षणं।।१९३

एषवैनृत्य अंगच ज्ञातव्यंनृत्यवेदिनः।
बामकट्योपरिभाग अपसव्येनतोलिता।।१९४

सव्येसव्यकटि न्यून वामतुंगविधानतः।
कटिदेशे समाकारे दक्षिणे पूर्ववत् सुधीः।।१९५

सव्यतुङ्ग इतिख्यातः कर्त्तव्या सा विधियतेः।
समभागेकटियुग्मो सौम्यसंमुखदर्शने।।१९५

समतुङ्गेन उतुङ्ग नृत्यार्थी मोददायकः।
निम्नगा तल चुम्बि सा विक्षिप्ता विपरीतगा।।१९६

विक्षिप्तभावचरणा क्षिप्तनाभि प्रतिष्ठिता।
बन्धनृत्ये सदारम्यंतलसंपुट चारिणी।।१९७

कटिचतुर्विधा मुख्या उग्रेलास्ये विशेषतः।
कट्यानुसारिणी पाद ताल पादानुभाविनी।।१९८

चतुरपादन्यासंच कुम्भदण्डंच सायकं।
विषमन्यास एतेषां मुख्यांध्रि नृत्तनर्तने।।१९९

भूम्यानुसारिणी पादः पादानुघातिकः गति।
कट्यानुसारिणी भंगी अपरे किं प्रयोजनं।।२००

वामतुङ्गानुयुत्तेऩ सायकपादमुत्तमं।
दक्षतुङ्गेतथान्याये सव्यदेशे मनोहरे।।२०१

समतुङ्गसमायुत्तेऩ कुम्भदण्डंतथैवच।
विषमाबहुधासर्वे तल संपुटगामिनी।।२०२

भरतादिकृतेशास्त्रे चतुरः स्वस्तिकादयः।
सर्वेचतुरन्यासेन जायते नात्र संशयः।।२०३

नृत्यारम्भे च प्रारम्भेदण्ड पादादिमाचरेत् ।
काव्यवाक्य प्रकाशेन दण्डपाद विगर्हितं।।२०४

नर्त्तने कुम्भहि श्रेष्ठः अभिताल प्रदर्शने।
कुम्भमुख्यसदानृत्ये सर्वभाव समन्वये।।२०५

सायक युग्म नृत्येन वाक्यालापे परस्परे।
उपर्य्युपरि पादाभ्यां संचालयेत नर्त्तकी।।२०६

विषमबहुधानृत्ये छन्दोबन्धे सुशोभिता।
*ललाटतलगले बन्धे उत्तालतालदर्शने।।२०७

रससंयुक्त पादाभ्यां सर्वेभावानुसारिणी।
दण्डपादे सदाशान्तं करुणहास्यदर्शयेत् ।।२०८

कलशेरुद्रशृङ्गारः चापे वीर रसात्मकः।
विषमे अद्भूते भीतौ विभत्सरस दर्शयेत् ।।२०९

रसयुक्ते सदापाद पाद संयुक्त गायने।
गायनानुसृतो हस्त एतानिधत्स्व धारणा।।२१०

सस्व, निरव, भेदः

द्विविध लास्ययोर्मध्ये निरवं सरवं तथा।
सरवे सरसेवाक्य निरवे निष्प्रयोजनं।।२११

निरवे मुख्यदृष्टिनां हस्तेन चारिणादयः।
सरवं हस्तयुक्तेन दृष्टिवाक्य विनोदनं।।२१२

क्रमेणैवं सदानृत्य देवतानन्द वर्द्धकः।
मुक्तिप्रदंसर्वकाम स्वर्गमोक्ष प्रदायकं।।२१३

सरवोनिरवो नृत्ये नृत्य संघातमण्डले।
वाद्यादि सहिते वाक्य करमुख्य विशेषतः।।२१४

काव्य वाक्यगते भव्य दृष्टिमाकर्षणोत्तमं।
कटितालानुभावेन पाद मानास्रूतं तथा।।२१५

